धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः ॥ उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः । विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्ण्या । तिस्रः सम्पूर्णफला विद्युदथोल्काशनिश्चेति ॥ अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ॥ विद्युत्सत्त्वत्रासं जनयन्ती तटतटस्वना सहसा । कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता ॥ धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम् । ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन ॥ तारा हस्तं दीर्घा शुक्ला ताम्राब्जतन्तुरूपा वा । तिर्यगधश्चोर्द्ध्वं वा याति वियत्युह्यमानेव ॥ उल्का शिरसि विशाला निपतन्ती वर्धते प्रतनुपुच्छा । दीर्घा भवति च पुरुषा भेदा बहवो भवन्त्यस्याः ॥ प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः । गोधाहिधूमरूपाः पापा या चोभयशिरस्का ॥ ध्वजझषकरिगिरिकमलेन्दुतुरगसन्तप्तरजतहंसाभाः । श्रीवत्सवज्रशङ्खस्वस्तिकरूपाः शिवसुभिक्षाः ॥ अम्बरमध्याद्बह्व्यो निपतन्त्यो राजराष्ट्रनाशाय । बम्भ्रमती गगनोपरि विभ्रममाख्याति लोकस्य ॥ संस्पृशती चन्द्रार्कौ तद्विसृता वा सभूप्रकम्पा च । परचक्रागमनृपवध-दुर्भिक्षावृष्टिभयजननी ॥ पौरेतरघ्नमुल्काप्रसव्यकरणं दिवाकरहिमांश्वोः । उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥ शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णाभा । क्रमशश्चैतान् हन्युर्मूर्धोरःपार्श्वपुच्छस्थाः ॥ उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा । ऋज्वी स्निग्धाखण्डा नीचोपगता च तद्वृद्ध्यै ॥ श्यामा वारुणनीलाऽसृग्दहनासितभस्मनिभा रूक्षा । सन्ध्यादिनजा वक्रा दलिता च परागमभयाय ॥ नक्षत्रग्रहघाते तद्भक्तीनां क्षयाय निर्दिष्टा । उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा ॥ भाग्यादित्यधनिष्ठामूलेषूल्काहतेषु युवतीनाम् । विप्रक्षत्रियपीडा पुष्यानिलविष्णुदेवेषु ॥ ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु चौराणाम् । क्षिप्रेषु कलाविदुषां पीडा साधारणे च हते ॥ कुर्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् । शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडाम् ॥ आशाग्रहोपघाते तद्देश्यानां खले कृषिरतानाम् । चैत्यतरौ सम्पतिता सत्कृतपीडां करोत्युल्का ॥ द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः । ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनो गोष्ठे ॥ क्ष्वेडास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा । उल्का निपातसमये भयाय राष्ट्रस्य सनृपस्य ॥ यस्याश्चिरं तिष्ठति खेऽनुषङ्गो दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुधृतेव खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥ श्रेष्ठिनः प्रतीपगा तिर्यगा नृपाङ्गनाः । हन्त्यधोमुखी नृपान् ब्राह्मणानथोर्द्ध्वगा ॥ बर्हिपुच्छरूपिणी लोकसङ्क्षयावहा । सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ हन्ति मण्डला पुरं छत्रवत् पुरोहितम् । वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ व्यालसूकरोपमा विस्फुलिङ्गमालिनी । खण्डशोऽथ वा गता सस्वना च पापदा ॥ सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा ॥ अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः" ॥ तत्कारणमुक्तं गर्गसंहितायाम् "अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः । नरापचारान्नियतमुपसर्गः प्रवर्त्तते । ततोऽपराधान्नियतमपवर्ज्जन्ति देवताः । ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान् । त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः । विचरन्ति विनाशाय रूपैः संबोधयन्ति च" इति । अनिष्टसूचकरूपभेदाश्च वृहत्संहितावाक्ये प्राक् दर्शिताः । तल्लक्षणं काश्यपेन सामान्यत उक्तम् "वृहच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला । पौरुषेय प्रमाणेन उल्का नानाविधा स्मृतेति" ।

**अग्न्युद्धार** पुं० अग्नेः आधनार्थमुद्धारः अरणिमन्थनेन उत्पादनम् । अरणिद्वयघर्षणेनानलोत्पादने । तत्प्रकारस्तु "अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः । तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्ध्वगापि वा ॥ अरणिस्तन्मयी प्रोक्ता तन्मय्येवोत्तरारणिः । सारवद्दारवञ्चात्रमोविली च प्रशस्यते ॥ संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते । अलाभे त्वशमीगर्भादुद्धरेदविलम्बितः ॥ चतुर्विंशतिरङ्गुष्ठदैर्घ्यं षडपि पार्थिवम् । चत्वार उच्छ्रये मानमरण्योः परिकीर्त्तितम् ॥ अष्टाङ्गुलः प्रमन्थः स्यात् चात्रं स्याद्द्वादशाङ्गुलम् । ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ॥ अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र वृहत्पर्व्वग्रन्थिभिर्म्मिनुयात् सदा ॥ गोवालैः शणसंमिश्रैस्त्रिवृत्तममलात्मकम् । व्याममात्रं नेत्रं स्यात् प्रमथ्यस्तेन पावकः ॥ मूर्द्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।